**अग्नितप्** ( agni-táp ) *adj.* **A** hot like fire परा वीरास एतन मर्यासो भद्रजानय: । अग्नितपो यथासथ ṚV. v. 61. 4; **B** practising austerities by means of fire [ Apte ]

**अग्नितपन** ( agni-tapana ) *n.* heating by fire तस्याभितापसंस्थानघर्माध्वगमनभारवहनाग्नितपनमुष्णे चातिकर्मप्रयोगात् गजसंनिपाताच्च स्नेहावसिक्तस्य घर्मावस्थापनमतिकर्मप्रयोगशारदस्येति Hastyāyur. 144. 22 ( 1. 18 )

**अग्नितपस्** ( agni-tápas ) *n.* **A** glowing like fire यदा वलस्य पीयतो जसुं भेद् बृहस्पतिरग्नितपोभिरर्कैः ṚV. x. 68. 8; **B** practising very austere penance standing in the midst of five fires [ Apte ]

**अग्नितप्त** ( agni-taptá ) *adj.* [ *f.* -ā ] heated with fire, made to glow with fire इन्द्रासोमा वर्तयतं दिवस्पर्यग्नितप्तेभिर्युवमश्महन्मभि: ṚV. vii. 104. 5 = AV. viii. 4. 5; आहिताग्निश्च कृत्स्नं नियन्ति सहाग्नितप्तै: AVPari. 1. (6). 2; पिबेत् पयोऽग्नितप्तं च निर्वाप्य गृहगोधिकाम् SuśruS. vi. 49. 31; जातुषे तु कण्ठसक्ते कण्ठे नाडीं प्रवेशयेत्तया चाग्नितप्तां सूक्ष्ममुखीं शलाकाम् AṣṭāSaṁ. i. 183. 1 (1. 37); i. 139. 16 (1. 27); स्पर्शादेव च विन्यासे सिद्धे नाग्नितप्तायःपिण्डस्पर्शनवद्दाहभयादङ्गुल्यग्रमात्रेण स्पर्शनं कर्तव्यमपि तु हस्तौ विन्यसितव्यौ ManuBh. i. 113. 23 (*on* 2. 72); वसन्ते हितम्…कौपं ग्राम्यमथाग्नितप्तममलं श्रेष्ठं तथा शीतलम् KalyāKā. 4. 12; पुरमध्ये सकात्मानं तदा शोधयितुं पुन: । अग्नितप्तस्य फालस्य समीपे व्यवतिष्ठते BṛKathāK. 102(4). 10; 102(10). 12; 135. 57; ( एवंविधा: समुद्भूता नरा नार्यश्च पातकै: ) भिन्नाश्चायोमयैस्तीक्ष्णैरग्नितप्तैश्च कीलकै: SkandP. v(2). 27. 10; KathāSaSāg. xii. 8. 155; ( गोमयेन ) अग्नितप्तेन य: स्वेद: शङ्करस्वेद उच्यते AśvaVai. 18. 2; अग्नितप्तं हि सौवीरं निषिञ्चेत्त्रिफलारसै: S'ārṅgaS. iii. 13. 113; TriṣaS'aPuC. i. 6. 5; S'rutaPra. iA. 151. 25 (*on* i. 1. 1); रौहिणेयो बभाणैवम्… गृह्णामि गोलमयसोऽग्नितप्तं दक्षिणे करे RauhiC. 280; PrabaK. 6. 14; आलोक्य दृष्टिरुणा प्रथमं मृगाक्ष्या गौरीकुचाहतिकिणोरसमिन्दुमौलिम् । पश्चादुदश्रुसलिलाभवदग्नितप्ता मारस्य दत्तनिशिताश्रु( ? श्रि )जलेव शक्ति: BhikṣāKā. 12. 4; तप्ताभिरित्यग्नितप्तपरम् VīraMi. 46. 10 (*on* 1. 20)

**अग्नितरु** ( agni-taru ) *m.* the plant *Plumbago zeylanica* चित्रक: स्यादग्नितरौ S'abdaRaSaK. 15. 10; तुषतोयेन संक्वाथ्य मूलमग्नितरूद्भवम् । पुष्पावसाने त्रिदिनं पीत्वा वन्ध्याभिजायते AnaṅgaRa. 6. 74.

**अग्नितर्पण** ( agni-tarpaṇa ) *n.* offering of oblation in the sacred fire ( घण्टा ) संचालनीया … जपस्तुत्यवसानाभ्यां प्रवृत्ते चाग्नितर्पणे PauṣkS. 34. 74 = PāraS. 6. 106; स्नात्वा निवृत्तरोगोऽसौ पूजयित्वा जगत्प्रभुम् । …पूजाग्नितर्पणम् । कुर्याच्चैव जपार्धेन JayāS. 25. 9; MṛgendraT. ii. 8. 211; अग्नितर्पणमग्निसाध्यकर्मानुष्ठानम् Aparā. 940. 29 (*on* 3. 45); अग्नितर्पणमग्निहोत्रम् VīraMi. 826. 4 (*on* 3. 46); सप्ततन्तु: क्रतुर्यज्ञोऽध्वरो यागोऽग्नितर्पणम् PañcTaPra. 8. 24.

**अग्नितर्मन्** ( agnitarman ) [ w. r. for अग्निशर्मन् Debru. p. 150 ]

**अग्नितस्** ( agni-tas ) *adv.* **1** from the fire, out of the fire, caused by or due to fire त्वय्येतद्वै विजानीहि जन्म कृष्णे यथा श्रुतम् ( v. l. यथाग्नितस् ) MahāBhā. iii. 32. 30; संतापोऽर्काग्नितश्चेति षड्विधम् Hastyāyur. 37. 8 (1. 4); यथा हि कालदुष्ट: स्यात् यथा सूक्ष्मोऽग्नित: कण: । स्वल्पस्तद्वत् क्रियाप्राप्तो गदो घोरतरो भवेत् HāriS. i. 3. 15; उज्जगामाग्नित: कोऽपि सहेमकवच: पुमान् NavaSāC. 11. 68; विद्यात्…पाषाणे भयमग्नित: SamarāSū. 16. 48; राम: … भृशं दिदीपे च निजेन तेजसा । ततो हृतेनार्क इवाग्नित: प्रगे Rāgh. 4. 78; **2** from the gross principle of fire पलं भुवोऽग्नितो रक्तं वातात् कृष्णं सितं जलात् । आकाशादश्रुमार्गाश्च जायन्ते नेत्रबुद्बुदे SuśruS. vi. 1. 11 (comm. अग्नितो रक्तमिति अग्निगुणाद्रक्तं पित्तरूपम् ); तेजोऽग्नितस्तथा क्रोध: चक्षुरूष्मा तथैव च । अग्निर्जरयते चापि पञ्चाग्नेया: शरीरिणाम् SarvaSiSaṁ. 11. 33; **3** from the fire-god, due to fire-god आग्नेयो ब्राह्मणश्चातस्तत्संबन्धाच्छ्रुतौ श्रुत: । अनुग्रहनियन्तृत्वे ब्राह्मणस्याग्नितो यत: BṛĀraUBhVā. i. 4. 1640; vi. 2. 2; तासु गर्भ: समभवत्षट्सु स्त्रीषु तदाग्नित: BrahmP. 82. 3; यथा द्युसिन्धो: सलिलाद्यथाग्नितस्तथैव पुण्यादपि भानुमण्डलात् । …समुद्भूतो जगद्द्विषां संहृतये गुह: पुन: PṛthviVi. 2. 15; **4** due to the digestive fire त्रिधा जग्धं भवत्यन्नं परिणामविशेषत: । स्थवीयान्मध्यमोऽणीयानित्येवं कालतोऽग्नित: BṛĀraUBhVā. i. 3. 253.

**अग्निता** ( agní-tā ) *f.* [ Debru. p. 617 ] **A** the presumed essential nature of fire यो वै पूर्व एत्यग्रऽएतीति वै तमाहु: सोऽएवास्याग्निता S'atBr. II. ii. 4. 2; **B** the state of being fire न वेदैर्ज्ञेयता तस्य ( वेधस: ) न शास्त्रैर्बहुभि: श्रुतै: । न यज्ञैर्न जपैर्होमै: शौचैर्वाग्नितयापि च BṛParāSm. 12. 129; क इवैति विपद्रतीह नो प्रतिकूलत्वमदोषवानपि । सुदृशो विरहेऽमृत(स्रवा: शशिभासो )प( ? ऽपि ) यदूहुरग्निताम् HarVi. 24. 5; दीपादौ नाग्निताल्पताल्पके S'ivDṛ. 5. 7; विद्यातपस्तेज:संपन्नविप्राणां मुखानि होमाधिकरणत्वेनाग्नितया निरूपितानि ManvaMu. 106. 1 (*on* 3. 98); ऋजु वक्रं वा काष्ठं हुताशदग्धं सदग्नितां याति PraboSu. 122.

**अग्निताप** ( agni-tāpa ) *m.* heat of fire अङ्गनालिङ्गनादग्नितापादिव समन्तत: । विलीयते मनुष्याणां विवेको नवनीतवत् TriṣaS'aPuC. i. 1. 365; PariPar. 2. 433; यत्तक्रम् … अग्नितापादिना स्वतो वा स्फुटितम् ( अपेयम् ) SmṛtiCan. v. 233. 3.

**अग्नितापन** ( agni-tāpana ) *n.* **1** heating on fire मृण्मयं भाण्डम् … शुद्ध्येत सलेपमग्नितापनात् BṛParāSm. 8. 332; अवच्छाद्य तापयित्वा स्वेदाद्यर्थमग्नितापनमदोष: ManuBh. i. 351. 13 (*on* 4. 53); **2** name of a chief of the army of demons अयि जम्भ महाजम्भ … अग्नितापन … शृण्वन्त्वाज्ञामादरात् SkandP. iv. 71. 72.

**अग्नितारका** ( agni-tārakā ) *f.* the constellation Kṛttikā उत्तरात्रयमैत्रेज्यदस्रा( ? स्रां )त्येन्द्रग्नितारका: । भौमवारेण संयुक्ता: पूर्णयोगा: प्रकीर्तिता: VasiS. 41. 13.

**अग्नितीर्थ** ( agni-tīrtha ) *n.* **1** name of a place of pilgrimage अग्नितीर्थं ततो गच्छेत् MahāBhā. iii. 81. 119; ix 46. 12; अग्नितीर्थमिति ख्यातं यमुनादक्षिणे तटे MatsyaP. 108. 27 = KūrmaP. 358. 10 (1. 39); 340. 2 (1. 35); अग्नितीर्थे नर: स्नात्वा वह्निलोकं प्रपद्यते NīlaP. 1283; 1253; रुद्रभागेऽग्नितीर्थे च पूज्यो रुद्र: सनातन: SkandP. vii(1). 321. 7; ii(3). 2. 43; iii(1). 2. 108; अग्नितीर्थमिति ख्यातं सिद्धं कुब्जाम्रके स्थितम् VarāP. 126. 63; BrahmP. 98. 1; 126. 38; 168. 28; PadmP. i. 27. 27; EI. xxv. 15. 32; **2** depression of the palm (standing for a *tīrtha* sacred to Agni) अग्न्यभाव औपासनाभावे पाणावग्नितीर्थे हस्तमध्यस्थ उपपादयेदाहुती: संपादयेत् ManvaVi. 407. 27 (*on* 3. 212); करमध्ये सौम्यमग्नितीर्थञ्च । तत्र सौम्येन नवान्नप्राशनादि आग्नेयेन प्रतिग्रहादि BālamBha. i. 74. 10 (*on* 1. 19); **3** holy water in the form of fire हीनवर्णेन तद्वर्णात्सुवर्णेन स्विकाहुति: । तद्वर्णार्थमिवात्यर्थमग्नितीर्थे समर्थ्यते ( ? समर्प्यते ) S'āliC. 2. 89.

**अग्नितीर्थतीर** ( agnitīrtha-tīra ) *n.* bank of the holy water called Agnitīrtha गोभूहिरण्यधान्यादि ब्राह्मणेभ्य: स्वशक्तित: । दत्त्वाग्नितीर्थतीरे तु सर्वपापै: प्रमुच्यते SkandP. iii(1). 51. 61.

**अग्नितीर्थपरायण** ( agnitīrtha-parāyaṇa ) *adj.* devoted to the place of pilgrimage Agnitīrtha एतस्मिन्नंतरे प्राप्ता अग्नितीर्थपरायणा: । सप्तर्षय: SkandP. vi. 21. 19.

**अग्नितीर्थसमुद्भूत** ( agnitīrtha-samudbhūta ) *adj.* [ *f.* -ā ] originating in the holy place Agnitīrtha (i. e. pertaining to Agnitīrtha) अत्र व: कीर्तयिष्यामि कथां पातकनाशिनीम् । अग्नितीर्थसमुद्भूताम् SkandP. vi. 90. 3.

**अग्नितुण्ड** ( agni-tuṇḍa ) *adj.* **1 A** having fire-like mouth (i. e. having sharp beak) ( कृतपातकिन: ) काककङ्कबकादिभि: । अग्नितुण्डैर्भक्ष्यमाणा: ViṣṇuSm. 43. 34 ( but comm. अग्निस्तुण्डे येषां ते भल्लूकादय: ); **1 B** having fire-like point तत एकं महाबाणमभिमन्त्र्य विनायक: । अग्नितुण्डम्…तत्याज दैत्यमस्तके GaṇeP. ii. 61. 11; **2** name of a medicine अथाग्नितुण्डवटीरस: अग्निमान्द्यादौ S'ārṅgaS. ii. 12. 222; अग्नितुण्डेति विख्यात: सर्वोदरगदापह: ( रस: ) RasRaSa. 20. 228.

**अग्नितुल्य** ( agni-tulya ) *adj.* [ *f.* -ā ] **A** (as harmful) as fire तस्माच्चिरोत्थितां विद्रधीं शस्त्रसर्पविद्युदग्नितुल्यां स्नेहविरेचनैराश्वेवोपक्रमेत् CaraS. i. 17. 101 (1922 Ed.); **B** (as hot) as fire अज्ञानतो यदा पीतं मद्यं विप्रेण कर्हिचित् । अग्नितुल्यं घृतं पीत्वा तावन्मात्रं विशुध्यति SkandP. vi. 197. 37; सुरादीनामन्यतममेकं सन्तापनादग्निसन्निभमुष्णत्वेनाग्नितुल्यम् … पीत्वा मरणाच्छुद्धो भवति Aparā. 1069. 8 (*on* 3. 253); **C** like fire (in character) कथमगमदहल्यामग्नितुल्यां बिडौजा: … न भवति यदि माया KarpūC. 7.

**अग्नितुल्यत्व** ( agnitulya-tva ) *n.* the state of being at par with Agni सहयुक्तेऽप्रधाने इत्यनुशासनेन गुणत्वस्यैवावगते: नाग्नितुल्यत्वमित्युक्तम् MīmāKau. ii. 293. 17 (*on* iii. 2. 36)

**अग्नितृप्त** ( agni-tṛpta ) *adj.* satisfied with water sipped from the depression of the palm ( called ) Agnitīrtha मुखमग्नितृप्तं सर्वं प्रोक्षति ĀcamU. 6. 5.

**अग्नितृप्ति** ( agni-tṛpti ) *f.* satisfaction of (the sacred) fire अग्नितृप्तिर्न विवक्षितेत्याह अग्निसाध्यानीति BālamBha. iii. 89. 18 (*on* 3. 46)

**अग्नितेजस्** ( agní-tejas ) *adj.* [ AltGr. II. i. 297 ] having the sharpness of fire, as bright as fire विष्णो: क्रमोऽसि सपत्नहा पृथिवीसंशितोऽग्नितेजा: AV. x. 5. 25; तत: पार्थो महातेजा: विशिखानग्नितेजस: । चिक्षेप समरे क्रुद्ध: MahāBhā. iv. 52. 20; राक्षसानां च सदृशा: पिशाचानां च रोमशा: । एतस्य सैन्ये बहवो विचरन्त्यग्नितेजस: Rāmā. vi. 18. 15; अग्निवर्णमभिषिच्य राघव: स्वे पदे तनयमग्नितेजसम् । शिश्रिये श्रुतवतामपश्चिम: पश्चिमे वयसि नैमिषं वशी RaghuVa. 19. 1; अग्निप्रवेशं ये कुर्युर्दृढसत्त्वा जितेन्द्रिया: । स्त्रियो वा सत्त्वसंपन्नास्ते सर्वेऽप्यग्नितेजस: SkandP. iv. 10. 29 = S'ivaP. iii. 15. 60 (314B. 9); अग्नितेजा: सर्वेभ्योऽपराजितो भवति BhaviP. 63B. 13 (i. 29. 33)

**अग्नितेजस्** ( agni-tejas ) *n.* **A** heat of the digestive fire उदीर्णपित्ता